मद्यं मांसं तथाम्लञ्च हितं लशुनसेविनाम् ॥
व्यायाममातपं रोषमतिनीरं पयो गुडम् ।
रसोनमश्नन् पुरुषस्त्यजेदेतन्निरन्तरम् ॥”
इति भावप्रकाशः ॥ * ॥

अन्यच्च ।
“लशुनः क्षारमधुरः कण्ठ्यो वृष्यो गुरुः सरः ।
भग्नसन्धानकृद्बल्यो रक्तपित्तप्रदूषणः ॥”
इति राजवल्लभः ॥

(तथाचास्य गुणादिविषयो यथा,—
“कट्वम्लवीर्य्यो लशुनो हितश्च
स्निग्धो गुरुः स्वादुरसोऽथ बल्यः ।
वृष्यश्च मेधास्वरवर्णचक्षु-
र्भग्नास्थिसन्धानकरः सुतीक्ष्णः ॥
हृद्रोगजीर्णज्वरकुक्षिशूल-
प्रमेहहिक्कारुचिगुल्मशोफान् ।
दुर्नामकुष्ठानलमान्द्यजन्तु-
समीरणं श्वासकफान्निहन्ति ॥”
इति हारीते कल्पस्थाने तृतीयाध्याये ॥
“शीतवातहिमदग्धतनूनां
स्तब्धभुग्नकुटिलव्यथिताङ्गाम् ।
भेषजस्य पवनोपहतानां
वक्ष्यते विधिरतो लशुनस्य ॥”
“शीलयेल्लशुनं शीते वसन्तेऽपि कफोल्बणः ।
घनोदयेऽपि वातार्त्तः सदा वा ग्रीष्मलीलया ॥”
इति वागभटे उत्तरस्थाने ३९ अध्यायः ॥
“क्रिमिकुष्ठकिलासघ्नो वातघ्नो गुल्मनाशनः ।
स्निग्धश्चोष्णश्च वृष्यश्च लशुनः कटुको गुरुः ॥”
इति चरके सूत्रस्थाने २७ अध्यायः ॥ )

लशूनः, पुं. ( रसेन ऊनः रस्य लत्वम् । पृषोदरादित्वात् सस्य शः अकारलोपश्च ।) लशुनः । इति शब्दरत्नावली ॥

लष, क शिल्पयोगे । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-अक०-सेट् । ) क, लाषयति कुशलो नृत्ये शिल्पं युनक्तीत्यर्थः । इति दुर्गादासः ॥

लष, ञ स्पृहि । इति कविकल्पद्रुमः ॥ ( भ्वा०-उभ०-सक०-सेट् । ) ञ, लषति लषते । इति दुर्गादासः ॥

लष, य ञ स्पृहि । इति कविकल्पद्रुमः ॥ ( दिवा०-उभ०-सक०-सेट् । ) य ञ, लष्यति लष्यते । इति दुर्गादासः ॥

लष्वः, पुं, ( लाषयति नृत्ये शिल्पं युनक्तीति । लष्+“सर्व्वनिघृष्वरिष्वेति ।” उणा० १।१५३। इति वन्प्रत्ययेन साधुः । ) नर्त्तकः । इत्युणादिकोषः ॥

लस, श्लिषि । क्रीडे । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-अक०-सेट् । ) लसति । इति दुर्गादासः ॥

लस, क शिल्पयोगे । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-अक०-सेट् । ) क, लासयति कुशलो नृत्ये शिल्पं युनक्तीत्यर्थः । इति दुर्गादासः ॥

लसा, स्त्री, ( लसतीति । लस्+अच् । ) हरिद्रा । इति हारावली । ९३ ॥

लसिका, स्त्री, ( लसतीति । लस्+अच् । ततः कन् ततष्टापि अत इत्वम् ।) लाला । यथा,—
“लालायां पिच्छला ख्याता लसिका लासिका तथा ॥”
इति शब्दचन्द्रिका ॥

लसीका, स्त्री, इक्षुरसः । त्वङ्मांसमध्यगरसः । इति केचित् ॥ ( यथा । “लसीका उदकविशेषः । यथाह चरकः । यत्तु मांसत्वगन्तरे उदकं तल्लसीकाशब्दं लभते ।” इति विजयरक्षितकृतप्रमेहरोगव्याख्याने ॥
“यत्तु त्वगन्तरे व्रणगतं लसीकाशब्दं लभते ।”
इति चरके शारीरस्थाने सप्तमेऽध्याये ॥)

लस्ज, ई ओ ङ व्रीडे । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-अक०-सेट् । निष्ठायामनिट् । ) क्विपि संयोगादिलोपे लक् । ई ओ, लग्नः । ङ, लज्जते । इति दुर्गादासः ॥

लस्तः, त्रि, श्लिष्टः । क्रीडितः । शिल्पयुक्तः । लसधातोः क्तप्रत्ययेन निष्पन्नः । इति लस्तकशब्दव्युत्पत्तौ भरतश्च ॥

लस्तकः, पुं, धनुषो मध्यभागः । इत्यमरः ॥

लस्तकी, [न्] पुं, ( लस्तकोऽस्त्यस्येति । लस्तक+इनिः । ) धनुः । इति शब्दमाला ॥

लहरिः, लहरी, } स्त्री, महातरङ्गः । तत्पर्य्यायः । उल्लोलः २ कल्लोलः ३ । इति हेमचन्द्रः शब्दरत्नावली च ॥ ( यथा, आर्य्यासप्तशत्याम् । ६१४ ।
“सरित इव यस्य गेहे शुष्यन्ति विशाल-
गोत्रजा नार्य्यः ।
क्षाराब्धिव स तृप्यति जलनिधिलहरिषु जलद
इव ॥” )

ला, ल ग्रहे । इति कविकल्पद्रुमः ॥ ( अदा०-पर०-सक०-अनिट् । ) ल, लाति । ग्रहो ग्रहणम् । इति दुर्गादासः ॥

ला, स्त्री, ग्रहणम् । दानम् । इति मेदिनी । ले, १ ॥

लाक्षकी, स्त्री, सीता । यथा,—
“राघव ते इयं सीता द्वारकेशस्य रुक्मिणी ।
विष्णोऽवतारमात्रस्य लक्ष्मीर्य्या कमलालया ॥
वाराणस्यां विशालाक्षी विमला पुरुषोत्तमे ।
वैकुण्ठे तु महालक्ष्मी राधा वृन्दावने वने ॥
लक्षशः कमला दास्यो यस्याः सा लाक्षकी
मता ।
एवं शतसहस्राणामीश्वरी राधिकाधिका ॥”
इति पाद्मोत्तरखण्डे ५५ अध्यायः ॥

लाक्षणिकः, पुं, लक्षणया प्रतिपादकः । इति साहित्यदर्पणम् ॥ लक्षणात्मकवृत्तिमत्पदत्वं लाक्षणिकत्वम् । इति सारमञ्जरी ॥ ( यथा, विभक्तितत्त्वार्थवादे ।
“शक्तो लाक्षणिको रूढो योगरूढश्च यौगिकः ।
क्वचित् यौगिकरूढश्च शब्दः षोढा निगद्यते ॥”
(लक्षणमधीते वेद वा । लक्षण+“क्रतूक्थादि-सूत्रान्तात् ठक् ।” ४ । २ । ६० । इति ठक् । लक्षणाभिज्ञे, त्रि ॥ )

लाक्षा, स्त्री, ( लक्ष्यतेऽनयेति । लक्ष्+“गुरोश्च हलः ।” ३।३।१०३ । इति अः । टाप् । यद्वा, “बाहुलकात् राजतेरपि सः । कपिलिकादित्वात् वा लत्वम् ।” इत्युज्ज्वलः । ३ । ६२ । ) रक्तवर्णवृक्षनिर्यासविशेषः । लाहा इति भाषा ॥ तत्पर्य्यायः । राक्षा २ जतु ३ यावः ४ अलक्तः ५ द्रुमामयः ६ । इत्यमरः ॥ खदिरिका ७ रक्ता ८ रङ्गमाता ९ पलङ्कषा १० क्रिमिहा ११ द्रुमव्याधिः १२ अलक्तकः १३ पलाशी १४ सुद्रिणी १५ दीप्तिः १६ जन्तुका १७ गन्धमादिनी १८ नीला १९ द्रवरसा २० पित्तारिः २१ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । कषायत्वम् । श्लेष्मपित्तार्श्शोफविषरक्तविषमज्वरनाशित्वञ्च । इति राजनिर्घण्टः ॥ भग्नविसर्पत्वग्दोषनाशित्वम् । बल्यत्वञ्च । इति राजवल्लभः ॥ अपि च ।
“लाक्षा वर्ण्या हिमा बल्या स्निग्धा च तुवरा
लघुः ।
अनुष्णा कफपित्तास्रहिक्काकासज्वरप्रणुत् ॥
व्रणोरःक्षतवीसर्पक्रिमिकुष्ठगदापहा ।
अलक्तको गुणैस्तद्वद्विशेषाद्व्यङ्गनाशनः ॥”
इति भावप्रकाशः ॥
( शतपत्री । सेवती । गुलाव इति च । तत्पर्य्यायो यथा,—
“शतपत्री तरुण्युक्ता कर्णिका चारुकेशरा ।
महाकुमारी गन्धाढ्या लाक्षा स्रग्णातिमञ्जुला ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लाक्षातरुः, पुं, ( लाक्षोत्पादकस्तरुः । ) पलाशवृक्षः । इति शब्दमाला ॥ ( पलाशशब्देऽस्य विशेष ज्ञेयः ॥ )

लाक्षातैलं, क्ली, ( लाक्षादिभिः पक्वं तैलम् । ) पक्वतैलविशेषः । लाक्षादितैलमिति ख्यातम् । तद्द्विविधं स्वल्पं वृहच्च । यथाक्रमं तत्प्रकारं तद्गुणश्चाह ।
“लाक्षाहरिद्रामञ्जिष्ठाकल्कैस्तैलं विपाचितम् ।
षड्गुणेनारनालेन दाहशीतज्वरापहम् ॥”
इति स्वल्पलाक्षातैलम् ॥
वृहद्यथा,—
“लाक्षारसाढके प्रस्थं तैलस्य विपचेद्भिषक् ।
मस्त्वाढकसमायुक्तं पिष्ट्वा चात्र समावपेत् ॥
शतपुष्पां हरिद्राञ्च मूर्व्वां कुष्ठं हरेणुकाम् ।
कटुकां मधुकां रास्नामश्वगन्धाञ्च दारु च ॥
मुस्तकं चन्दनञ्चैव पृथगक्षसमानकैः ।
द्रव्यैरेतैश्च तत् सिद्धं अभ्यङ्गान्मारुतापहम् ॥
विषमाख्यान् ज्वरान् सर्व्वानाश्वेव प्रशमं
नयेत् ।
कासं श्वासं प्रतिश्यायं कण्डूं दौर्गन्ध्यगौरवम् ॥
त्रिकपृष्ठग्रहं शूलं गात्राणां स्फुटनन्तथा ।
पापालक्ष्मीप्रशमनं सर्व्वग्रहनिवारणम् ।
अश्विभ्यां निर्म्मितं सम्यक् तैलं लाक्षादिकं
महत ॥”
इति वृहल्लाक्षातैलम् । इति सुखबोधः ॥